# अध्यायः ६

# ध्यानयोगः

अतीत-अनन्तर-अध्यायान्ते ध्यान-योगस्य, सम्यग्दर्शनं प्रति अन्तरङ्गस्य सूत्र-भूताः श्लोकाः

स्पर्शान्कृत्वा बहिः (गी ५.२७) इत्यादयः उपदिष्टाः।

तेषां वृत्ति-स्थानीयोऽयं षष्ठोऽध्याय आरभ्यते। तत्र ध्यान-योगस्य बहिरङ्गं कर्मेति यावद् ध्यान-

योगारोहण-असमर्थः तावद् गृहस्थेन अधिकृतेन कर्त्तव्यं कर्मेत्यतः तत् स्तौति।।

ननु किमर्थं ध्यान-योगारोहण-सीमाकरणं यावता अनुष्ठेयमेव विहितं कर्म यावज्जीवम्।।

न। आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते (गी ६.३) इति विशेषणात्, आरूढस्य च शमेनैव

सम्बन्ध-करणात्। आरुरुक्षोः आरूढस्य च शमः कर्म च उभयं कर्त्तव्यत्वेन अभिप्रेतं चेत् स्यात्,

तदा आरुरुक्षोः आरूढस्य च इति शम-कर्म-विषय-भेदेन विशेषणं, विभाग-करणं च अनर्थकं

स्यात्।।

तत्र आश्रमिणां कश्चिद् योगमारुरुक्षुर्भवति आरूढश्च कश्चित्।

अन्ये न आरुरुक्षवः न च आरूढाः।

तानपेक्ष्य[1] आरुरुक्षोः आरूढस्य च इति विशेषणं, विभाग-करणं च उपपद्यत एवेति चेत् ।।

न। तस्यैव इति वचनात्। पुनर्योग-ग्रहणाच्च योगारूढस्य इति य आसीत् पूर्वं योगमारुरुक्षुः तस्यैव

आरूढस्य शम एव कर्त्तव्यः कारणं योग-फलं प्रत्युच्यत इति। अतो न यावज्जीवं कर्त्तव्यत्व-

1 अनारुरुक्षून् अनारूढान् च तृतीयान् अपेक्ष्य।

प्राप्तिः कस्यचिदपि कर्मणः।

योग-विभ्रष्ट-वचनाच्च। गृहस्थस्य चेत् कर्मिणो योगो विहितः षष्ठेऽध्याये, स योग-विभ्रष्टोऽपि कर्म-

गतिं कर्म-फलं प्राप्नोतीति तस्य नाश-आशङ्का अनुपपन्ना स्यात्।

अवश्यं हि कृतं कर्म काम्यं नित्यं वा - मोक्षस्य नित्यत्वादनारभ्यत्वे - स्वं फलमारभत एव।

नित्यस्य च कर्मणो वेद-प्रमाणावबुद्धत्वात् फलेन भवितव्यम् इत्यवोचाम।

अन्यथा वेदस्यानर्थक्य-प्रसङ्गादिति।

न च कर्मणि सति उभय-विभ्रष्ट-वचनमर्थवत् कर्मणो विभ्रंश-कारणानुपपत्तेः।।

कर्म कृतमीश्वरे संन्यस्य इत्यतः कर्त्तरि कर्म फलं नारभते इति चेत्।।

न। ईश्वरे संन्यासस्याधिकतर-फल-हेतुत्व-उपपत्तेः।।

मोक्षायैवेति चेत्। स्व-कर्मणां कृतानाम् ईश्वरे न्यासो मोक्षायैव, न फलान्तराय योग-सहितः[2]।

योगाच्च विभ्रष्ट इत्यतः तं प्रति नाश-आशङ्का युक्तैवेति चेत्।।

न। एकाकी यत-चित्तात्मा निराशीरपरिग्रहः (गी ६.१०) ब्रह्मचारिव्रते स्थितः, (गी ६.१४) इति

कर्म-संन्यास-विधानात्। न च अत्र ध्यान-काले स्त्री-सहायत्वाशङ्का येनैकाकित्वं विधीयते।

न च गृहस्थस्य निराशीरपरिग्रहः इत्यादि-वचनमनुकूलम्।    उभय-विभ्रष्ट-प्रश्नानुपपत्तेः च[3]।।

---

[2] कर्म-ध्यान-योगद्वयसहितः योगद्वयाच्च विभ्रष्टः।

अनाश्रितः इत्यनेन कर्मिण एव संन्यासित्वं योगित्वं चोक्तम्, प्रतिषिद्धं च निरग्नेः अक्रियस्य च संन्यासित्वं योगित्वं चेति चेत्।

न। ध्यान-योगं प्रति बहिरङ्गस्य सतः कर्मणः फलाकाङ्क्षा-संन्यासस्तुतिपरत्वात्।

न केवलं निरग्निरक्रिय एव संन्यासी योगी च।

किं तर्हि कर्म्यपि, कर्म-फलासङ्गं संन्यस्य कर्मयोगम् अनुतिष्ठन् सत्त्व-शुद्ध्यर्थं स संन्यासी च योगी च भवति इति स्तूयते।

न चैकेन वाक्येन कर्म-फलासङ्ग-संन्यास-स्तुतिः चतुर्थाश्रम-प्रतिषेधः च उपपद्यते।

---

[3] ध्यानयोगस्य संन्यासिविषयत्वात् गृहस्थस्य न कर्मत्यागो, नापि ध्यानयोग-त्याग इति नोभयविभ्रष्टवचनं तं प्रति।

न च प्रसिद्धं निरग्नेरक्रियस्य परमार्थ-संन्यासिनः श्रुति-स्मृति-पुराणेतिहास-योग-शास्त्र-विहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान्।

स्व-वचन-विरोधाच्च। सर्वकर्माणि मनसा संन्यस्य .. नैव कुर्वन् न कारयन् आस्ते (गी ५.१३) मौनी सन्तुष्टो येन केनचिद् अनिकेतः स्थिरमतिः (गी १२.१९) विहाय कामान् यः सर्वान् पुमान् चरति निःस्पृहः (गी २.७१) सर्वारम्भपरित्यागी (गी १२.१६) इति च तत्र तत्र भगवता स्व-वचनानि दर्शितानि, तैर्विरुध्येत चतुर्थाश्रम-प्रतिषेधः।

तस्माद् मुनेः योगमारुरुक्षोः प्रतिपन्न-गार्हस्थ्यस्य अग्निहोत्रादि-फल-निरपेक्षम् अनुष्ठीयमानं ध्यान-

योगारोहण-साधनत्वं सत्त्व-शुद्धि-द्वारेण प्रतिपद्यत इति स संन्यासी च योगी च इति स्तूयते -

**श्रीभगवानुवाच।**

**अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।**

**स संन्यासी च योगी च न निरग्निर्न चाक्रियः।। ६.१ ।।**

अनाश्रितेति। अनाश्रितः न आश्रितः अनाश्रितः।

किम् कर्मफलं कर्मणः फलं कर्म-फलं यत्तदनाश्रितः। कर्म-फल-तृष्णा-रहित इत्यर्थः।

यो हि कर्म-फल-तृष्णावान् स कर्म-फलम् आश्रितो भवति।

अयं तु तद्विपरीतोऽतोऽनाश्रितः कर्म-फलम्।

एवं-भूतः सन् कार्यं कर्त्तव्यं नित्यं काम्य-विपरीतम् अग्निहोत्रादिकं कर्म करोति निर्वर्त्तयति यः

कश्चिद् ईदृशः कर्मी सः कर्म्यन्तरेभ्यो विशिष्यते इत्येवमर्थमाह - सः संन्यासी च योगी च इति।

संन्यासः परित्यागः स यस्य अस्ति स संन्यासी च। योगी च योगश्चित्त-समाधानं स यस्यास्ति स

योगी च। इत्येवं-गुण-सम्पन्नोऽयं मन्तव्यः।

न केवलं निरग्निः अक्रियः एव संन्यासी योगी चेति मन्तव्यः।

निर्गता अग्नयः कर्माङ्ग-भूता यस्मात् स निरग्निः, अक्रियश्च अनग्नि-साधना अपि अविद्यमानाः

क्रियाः तपो-दानादिका यस्यासौ अक्रियः।

ननु च निरग्नेरक्रियस्य एव श्रुति-स्मृति-योग-शास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धं कथमिह साग्नेः

सक्रियस्य संन्यासित्वं योगित्वं चाप्रसिद्धम् उच्यत इति।

नैष दोषः। कयाचिद् गुणवृत्त्योभयस्य सम्पिपादयिषितत्वात्।। १।।

तत्कथं कर्म-फल-सङ्कल्प-संन्यासात् संन्यासित्वं, योगाङ्गत्वेन च कर्मानुष्ठानात् कर्म-फल-सङ्कल्पस्य वा चित्त-विक्षेप-हेतोः परित्यागाद् योगित्वं चेति गौणमुभयं, न पुनर्मुख्यं संन्यासित्वं योगित्वं चाभिप्रेतमिति एतमर्थं दर्शयितुमाह -

**यं संन्यासमिति प्राहुः योगं तं विद्धि पाण्डव।**

**न ह्यसंन्यस्तसङ्कल्पः योगी भवति कश्चन।। ६.२।।**

यमिति। यं सर्व-कर्म-तत्फल-परित्याग-लक्षणं परमार्थ-संन्यासं इति प्राहुः श्रुति-स्मृति-विदः योगं कर्मानुष्ठान-लक्षणं तं परमार्थ-संन्यासं विद्धि जानीहि हे पाण्डव।

कर्म-योगस्य प्रवृत्ति-लक्षणस्य तद्विपरीतेन निवृत्ति-लक्षणेन परमार्थ-संन्यासेन कीदृशं

सामान्यमङ्गीकृत्य तद्भावः उच्यते इति अपेक्षायाम् इदमुच्यते।

अस्ति परमार्थ-संन्यासेन सादृश्यं कर्तृ-द्वारकं कर्म-योगस्य।

यो हि परमार्थ-संन्यासी स त्यक्त-सर्व-कर्म-साधनतया सर्व-कर्म-तत्फल-विषयं सङ्कल्पं प्रवृत्ति-

हेतु-काम-कारणं संन्यस्यति।

अयमपि कर्म-योगी कर्म कुर्वाण एव फल-विषयं सङ्कल्पं संन्यस्यति इत्येतमर्थं दर्शयिष्यन्नाह -

न हि यस्मात् असंन्यस्तसङ्कल्पः असंन्यस्तः अपरित्यक्तः फल-विषयः सङ्कल्पः अभिसन्धिः

येन सोऽसंन्यस्त-सङ्कल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति।

न सम्भवतीत्यर्थः। फल-सङ्कल्पस्य चित्त-विक्षेप-हेतुत्वात्।

तस्माद्यः कश्चन कर्मी संन्यस्त-फल-सङ्कल्पो भवेत् स योगी समाधानवान् अविक्षिप्त-चित्तो भवेत्, चित्त-विक्षेप-हेतोः फल-सङ्कल्पस्य संन्यस्तत्वाद् इति अभिप्रायः।

एवं परमार्थ-संन्यास-कर्म-योगयोः कर्त्तृ-द्वारकं संन्यास-सामान्यमपेक्ष्य यं संन्यासमिति प्राहुः योगं तं विद्धि पाण्डव इति कर्म-योगस्य स्तुत्यर्थं संन्यासत्वम् उक्तम्।। २ ।।

ध्यान-योगस्य फल-निरपेक्षः कर्म-योगो बहिरङ्गं साधनमिति तं संन्यासत्वेन स्तुत्वा, अधुना कर्म-

योगस्य ध्यान-योग-साधनत्वं दर्शयति -

**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**

**योगारूढस्य तस्यैव शमः कारणमुच्यते।। ६.३**

आरुरुक्षोरिति। आरुरुक्षोः आरोढुमिच्छतः अनारूढस्य, ध्यानयोगेऽवस्थातुमशक्तस्यैव इत्यर्थः।

कस्य आरुरुक्षोः मुनेः कर्म-फल-संन्यासिन इत्यर्थः।

किम् आरुरुक्षोः योगम् कर्म कारणं साधनम् उच्यते। योगारूढस्य पुनः तस्यैव शमः उपशमः

सर्व-कर्मभ्यो निवृत्तिः कारणं योगारूढत्वस्य साधनम् उच्यते इत्यर्थः।

यावद्यावत् कर्मभ्य उपरमते तावत् तावन्निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते।

तथा सति स झटिति योगारूढो भवति।

तथा चोक्तं व्यासेन “नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च।

शीलं स्थितिर्दण्डनिधानम् आर्जवं ततस्ततश्चोपरमः क्रियाभ्यः” (म.भा.शां १७५.३७) इति ।।

३।।

अथ इदानीं कदा योगारूढः भवति इत्युच्यते - यदेति।

**यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।**

**सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते।। ६.४**

यदेति। यदा समाधीयमान-चित्तो योगी हि इन्द्रियार्थेषु इन्द्रियाणामर्थाः शब्दादयः तेषु इन्द्रियार्थेषु कर्मसु च नित्य-नैमित्तिक-काम्य-प्रतिषिद्धेषु प्रयोजनाभाव-बुद्ध्या न अनुषज्जते अनुषङ्गं कर्त्तव्यता-बुद्धिं न करोतीत्यर्थः। सर्वसङ्कल्पसंन्यासी सर्वान् सङ्कल्पान् इह अमुत्रार्थ-काम-हेतून् संन्यसितुं शीलमस्येति सर्व-सङ्कल्प-संन्यासी योगारूढः प्राप्त-योग इत्येतत्। तदा तस्मिन् काले उच्यते।।

सर्व-सङ्कल्प-संन्यासीति वचनात् सर्वांश्च कामान् सर्वाणि च कर्माणि संन्यसेदित्यर्थः।

सङ्कल्प-मूलाः हि सर्वे कामाः - “सङ्कल्प-मूलः कामो वै यज्ञाः सङ्कल्प-सम्भवाः” (मनु. २.२), “काम जानामि ते मूलं सङ्कल्पात् खिल जायसे।

न त्वां सङ्कल्पयिष्यामि समूलो न भविष्यसि” (म.भा.शां. १७७.२५) इत्यादि-स्मृतेः।

सर्व-काम-परित्यागे च सर्व-कर्म-संन्यासः सिद्धो भवति, “स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते” (बृ. ४.४.५) इत्यादि-श्रुतिभ्यः, “यद्यद्धि कुरुते जन्तुः तत्तत्कामस्य चेष्टितम्” (मनु. २.४) इत्यादि-स्मृतिभ्यश्च।

न्यायाच्च - न हि सर्व-सङ्कल्प-संन्यासे कश्चित् स्पन्दितुमपि शक्तः।

तस्मात् सर्व-सङ्कल्प-संन्यासीति वचनात् सर्वान् कामान् सर्वाणि कर्माणि च त्याजयति

भगवान्।। ४ ।।

यदा एवं योगारूढः तदा तेन आत्मा आत्मना उद्धृतो भवति संसाराद् अनर्थव्रातात्।

अतः -

**उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत्।**

**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।। ६.५**

उद्धरेदिति। उद्धरेत् संसार-सागरे निमग्नम् आत्मनाऽऽत्मानं तत उद् ऊर्ध्वं हरेद् उद्धरेत्।

योगारूढताम् आपादयेद् इत्यर्थः। न आत्मानम् अवसादयेत् न अधो नयेन्नाधो गमयेत्।

आत्मैव हि यस्माद् आत्मनो बन्धुः। न ह्यन्यः कश्चिद् बन्धुर्यः संसार-मुक्तये भवति।

बन्धुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादि-बन्धन-आयतनत्वात्।

तस्माद् युक्तमवधारणम् आत्मैव ह्यात्मनो बन्धुः इति। आत्मैव रिपुः शत्रुः।

योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्म-प्रयुक्तः एवेति युक्तमेव अवधारणम् आत्मैव रिपुः आत्मनः इति।। ५ ।।

आत्मा एव बन्धुः आत्मा एव रिपुः आत्मनः इत्युक्तम्। तत्र किंलक्षणः आत्मनः बन्धुः किंलक्षणः

वा आत्मनः रिपुः इत्युच्यते -

**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।**

**अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्।।६.६।।**

बन्धुरिति। बन्धुरात्माऽऽत्मनस्तस्य तस्याऽऽत्मनः स आत्मा बन्धुः। येन आत्मना आत्मैव जितः

आत्मा कार्य-करण-सङ्घातो येन वशीकृतो जितेन्द्रिय इत्यर्थः। अनात्मनस्तु अजितात्मनस्तु शत्रुत्वे

शत्रु-भावे वर्तेताऽऽत्मैव शत्रुवत्। यथा अनात्मा शत्रुरात्मनोऽपकारी तथा आत्मा आत्मनोऽपकारे

वर्त्तते इत्यर्थः।। ६ ।।

**जितात्मनः प्रशान्तस्य परमात्मा समाहितः।**

**शीतोष्णसुखदुःखेषु तथा मानापमानयोः।। ६.७**

जितात्मन इति। जितात्मनः कार्य-करणादि-सङ्घात आत्मा जितो येन स जितात्मा तस्य जितात्मनः। प्रशान्तस्य प्रसन्नान्तःकरणस्य सतः संन्यासिनः परमात्मा समाहितः साक्षाद् आत्मभावेन वर्त्तत इत्यर्थः।

किञ्च शीतोष्णसुखदुःखेषु तथा मानेऽपमाने च मानापमानयोः पूजा-परिभवयोः समः स्यात्।। ७ ।।

**ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।**

**युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः।। ६.८**

ज्ञानेति। ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्त-पदार्थानां परिज्ञानं, विज्ञानं तु शास्त्रतः ज्ञातानां तथैव स्वानुभव-करणं ताभ्यां ज्ञान-विज्ञानाभ्यां तृप्तः सञ्जातालं-प्रत्यय आत्मा अन्तःकरणं यस्य स ज्ञान-विज्ञान-तृप्तात्मा कूटस्थः अप्रकम्प्यो भवतीत्यर्थः।

विजितेन्द्रियः च। यः ईदृशः युक्तः समाहितः इति स उच्यते कथ्यते।

स योगी सम-लोष्टाश्मकाञ्चनः लोष्टाश्म-काञ्चनानि समानि यस्य स सम-लोष्टाश्म-काञ्चनः।। ८ ।।

**सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।**

**साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते।।६.९।।**

सुहृदिति। सुहृदित्यादि-श्लोकार्धमेक-पदम्। सुहृद् इति प्रत्युपकारमनपेक्ष्योपकर्त्ता। मित्रं स्नेहवान्।

अरिः शत्रुः। उदासीनः न कस्यचित्पक्षं भजते। मध्यस्थः यो विरुद्धयोः उभयोर्हितैषी।

द्वेष्यः आत्मनोऽप्रियः। बन्धुः सम्बन्धी इत्येतेषु साधुषु शास्त्रानुवर्त्तिषु अपि च पापेषु

प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः कर्त्ता किंकर्मा इत्यव्यापृत-बुद्धिरित्यर्थः।

विशिष्यते विमुच्यत इति वा पाठान्तरम्। योगारूढानां सर्वेषाम् अयमुत्तम इत्यर्थः।। ९ ।।

**योगी युञ्जीत सततमात्मानं रहसि स्थितः।**

**एकाकी यतचित्तात्मा निराशीरपरिग्रहः।। ६.१०**

योगीति। योगी ध्यायी युञ्जीत समादध्यात् सततं सर्वदा आत्मानम् अन्तःकरणं रहसि एकान्ते गिरि-गुहादौ स्थितः सन् एकाकी असहायः।

रहसि स्थितः एकाकी च इति विशेषणात् संन्यासं कृत्वेत्यर्थः। यतचित्तात्मा चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीः वीत-तृष्णः अपरिग्रहः च, परिग्रह-रहित इत्यर्थः।

संन्यासित्वे अपि त्यक्त-सर्व-परिग्रहः सन् युञ्जीत इत्यर्थः।। १० ।।

अथ इदानीं योगं युञ्जतः आसनाहार-विहारादीनां योगसाधनत्वेन नियमः वक्तव्यः।

प्राप्तयोग-लक्षणं यत्फलादि च इत्यतः आरभ्यते। तत्र आसनमेव तावत्प्रथममुच्यते -

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**

**नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्।६.११**

शुचौ इति। शुचौ शुद्धे विविक्ते स्वभावतः, संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरम् अचलम्

आत्मनः आसनं नात्युच्छ्रितं नातीवोच्छ्रितं न अपि अतिनीचम्।

तच्च चैलाजिनकुशोत्तरं चैलम् अजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिन-कुशोत्तरम्।

पाठक्रमाद् विपरीतोऽत्र क्रमः चैलादीनाम्।। ११ ।।

प्रतिष्ठाप्य किम् -

**तत्रैकाग्रं मनःकृत्वा यतचित्तेन्द्रियक्रियः।**

**उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये। ६.१२**

तत्रेति। तत्र तस्मिन् आसने उपविश्य योगं युञ्ज्यात्। कथम् सर्व-विषयेभ्य उपसंहृत्य एकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः चित्तं चेन्द्रियाणि च चित्तेन्द्रियाणि तेषां क्रियाः संयताः यस्य सः यत-चित्तेन्द्रिय-क्रियः।

सः किमर्थं योगं युञ्ज्यादित्याह - आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थम् इत्येतत्।। १२ ।।

बाह्य-साधनमासनम् उक्तम्। अधुना शरीर-धारणं कथमित्युच्यते -

**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**

**संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।। ६.१३**

सममिति। समं कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च काय-शिरो-ग्रीवं तत्समं धारयन् अचलं

च। समं धारयतश्चलनं सम्भवत्यतो विशिनष्टि अचलमिति।

स्थिरः स्थिरो भूत्वेत्यर्थः।

स्वं नासिकाग्रं संप्रेक्ष्य सम्यक्प्रेक्षणं दर्शनं कृत्वा। इव इति इव-शब्दो लुप्तो द्रष्टव्यः।

न हि स्व-नासिकाग्र-संप्रेक्षणमिह विधित्सितम्। किं तर्हि चक्षुषोर्दृष्टि-सन्निपातः।

स च अन्तःकरण-समाधानापेक्षो विवक्षितः।

स्व-नासिकाग्र-संप्रेक्षणम् एव चेद्विवक्षितं मनः तत्रैव समाधीयेत, नात्मनि।

आत्मनि हि मनसः समाधानं वक्ष्यति “आत्म-संस्थं मनःकृत्वा” (गी ६.२५) इति।

तस्माद् इव-शब्द-लोपेन अक्ष्णोर्दृष्टि-सन्निपात एव संप्रेक्ष्येत्युच्यते।

दिशश्चानवलोकयन् दिशां च अवलोकनमन्तरा अकुर्वन्नित्येतत्।। १३ ।।

**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।**

**मनः संयम्य मच्चित्तो युक्त आसीत मत्परः।। ६.१४**

प्रशान्तेति। प्रशान्तात्मा प्रकर्षेण शान्त आत्माऽन्तःकरणं यस्य सः अयं प्रशान्तात्मा।

विगतभीः विगत-भयः। ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरु-शुश्रूषा-भिक्षा-भुक्त्यादि तस्मिन् स्थितः। तदनुष्ठाता भवेदित्यर्थः। किञ्च मनः संयम्य मनसो वृत्तीः उपसंहृत्य इत्येतत्।

मच्चित्तः मयि परमेश्वरे चित्तं यस्य सोऽयं मच्चित्तः। युक्तः समाहितः सन् आसीत उपविशेत्।

मत्परः अहं परो यस्य सोऽयं मत्परः। भवति कश्चिद् रागी स्त्री-चित्तः, न तु स्त्रियमेव परत्वेन गृह्णाति, किं तर्हि राजानं महादेवं वा। अयं तु मच्चित्तो मत्परश्च।। १४ ।।

अथ इदानीं योगफलमुच्यते -

**युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः।**

**शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति।। ६.१५**

युञ्जन्निति। युञ्जन् समाधानं कुर्वन् एवं यथोक्तेन विधानेन सदाऽऽत्मानं योगी नियत-मानसः नियतं

संयतं मानसं मनो यस्य सोऽयं नियत-मानसः।

स शान्तिम् उपरतिं निर्वाणपरमां निर्वाणं मोक्षः, तत्परमा निष्ठा यस्याः शान्तेः सा निर्वाण-परमा

तां निर्वाण-परमां मत्संस्थां मदधीनाम् अधिगच्छति प्राप्नोति।। १५ ।।

इदानीं योगिन आहारादि-नियम उच्यते -

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**

**न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन।। ६.१६**

नेति। नात्यश्नतः आत्म-सम्मितमन्न-परिमाणम् अतीत्य अश्नतः अत्यश्नतो न योगोऽस्ति।

न चैकान्तमनश्नतः योगोऽस्ति।

“यदु ह वा आत्म-सम्मितमन्नं तदवति तन्न हिनस्ति“ “यद् भूयो हिनस्ति तद्यत्कनीयोऽन्नं न

तदवति“ (श.ब्रा - ९.२.१) इति श्रुतेः।

तस्माद्योगी नाऽऽत्म-सम्मितादन्नादधिकं न्यूनं वाऽश्नीयात्।

अथवा योगिनो योगशास्त्रे परिपठिताद् अन्न-परिमाणात् अतिमात्रमश्नतो योगो नास्ति।

उक्तं हि "अर्धं अशनस्य सव्यञ्जनस्य तृतीयम् उदकस्य तु। वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत्

(योगशास्त्र) इत्यादि परिमाणम्।

तथा न च अतिस्वप्नशीलस्य योगो भवति।

नैव चातिमात्रं जाग्रतो योगो भवति च अर्जुन।। १६ ।।

कथं पुनर्योगो भवतीत्युच्यते -

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**

**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।६.१७**

युक्तेति[4]। युक्ताहारविहारस्य आह्रियत इत्याहारोऽन्नं, विहरणं विहारः पादक्रमः, तौ युक्तौ नियत-परिमाणौ यस्य। तथा युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य कर्मसु। तथा युक्त-स्वप्नावबोधस्य युक्तौ स्वप्नश्चावबोधश्च, तौ नियत-कालौ यस्य तस्य। युक्ताहार-विहारस्य युक्त-चेष्टस्य कर्मसु युक्त-स्वप्नावबोधस्य योगिनः योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा। सर्व-संसार-दुःख-क्षय-कत् योगो भवतीत्यर्थः।। १७ ।।

---

4 शरीरम् आद्यं खलु धर्मसाधनम्।

अथाधुना कदा युक्तो भवतीत्युच्यते -

**यदा विनियतं चित्तमात्मन्येवावतिष्ठते।**

**निःस्पृहस्सर्वकामेभ्यो युक्त इत्युच्यते तदा।।६.१८**

यदेति। यदा विनियतं चित्तं विशेषेण नियतं संयतम् एकाग्रतामापन्नं चित्तं, हित्वा बाह्य-चिन्ताम्

आत्मन्येव केवले अवतिष्ठते। स्वात्मनि स्थितिं लभत इत्यर्थः।

निःस्पृहः सर्वकामेभ्यः निर्गता दृष्टादृष्ट-विषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहितः

इत्युच्यते तदा तस्मिन् काले।। १८

तस्य योगिनः समाहितं यच्चित्तं   तस्योपमोच्यते -

**यथा दीपो निवातस्थो नेङ्गते सोमपा स्मृता[5]।**

**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।।६.१९**

यथेति। यथा दीपः प्रदीपः निवातस्थो निवाते वात-वर्जिते देशे स्थितो नेङ्गते न चलति सोमपा

उपमीयतेऽनयेत्युपमा योगज्ञैः चित्त-प्रचार-दर्शिभिः स्मृता चिन्तिता।

योगिनो यत-चित्तस्य संयतान्तःकरणस्य युञ्जतो योगमनुतिष्ठतः आत्मनः समाधिमनुतिष्ठत

इत्यर्थः।। १९ ।।

---

5 अत्र दीपस्यानुरूपोपमा भवति। पर्वतोऽपि नेङ्गते किन्तु पर्वतस्य कदापि चलनं नास्ति। किञ्च मनः प्रकाशात्मकः चेतनवत्वात्। तस्मात् प्रकाशात्मकदीपस्योपमा अनुरूपा।

एवं योगाभ्यास-बलाद् एकाग्रीभूतं निवात-प्रदीप-कल्पं सत् -

**यत्रोपरमते चित्तं निरुद्धं योगसेवया।**

**यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।।६.२०**

यत्रेति। यत्र यस्मिन् काले उपरमते चित्तम् उपरतिं गच्छति निरुद्धं सर्वतो निवारित-प्रचारं योगसेवया योगानुष्ठानेन।

यत्र चैव यस्मिंश्च काले आत्मना समाधि-परिशुद्धेन अन्तःकरणेन आत्मानं परं चैतन्य-ज्योति-स्वरूपं पश्यन् उपलभमानः स्वे एव आत्मनि तुष्यति तुष्टिं भजते।। २० ।।

किञ्च -

**सुखमात्यन्तिकं यत्तद् बुद्धिग्राह्यमतीन्द्रियम्।**

**वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः।। ६.२१ ।।**

सुखमिति। सुखम् आत्यन्तिकम् अत्यन्तमेव भवति इत्यात्यन्तिकम्। अनन्तमित्यर्थः।

यत्तद् बुद्धिग्राह्यम् बुद्ध्यैवेन्द्रिय-निरपेक्षया गृह्यते इति बुद्धि-ग्राह्यम्।

अतीन्द्रियम् इन्द्रिय-गोचरातीतम् अविषय-जनितमित्यर्थः।

वेत्ति तदीदृशं सुखमनुभवति। यत्र यस्मिन् काले न चैव अयं विद्वान्, आत्म-स्वरूपे स्थितः

तस्मान्नैव चलति तत्त्वतः तत्त्व-स्वरूपान्न प्रच्यवत इत्यर्थः।। २१ ।।

किञ्च -

**यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।**

**यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते।। ६.२२ ।।**

यमिति। यं लब्ध्वा यमात्म-लाभं लब्ध्वा प्राप्य च अपरम् अन्यद् लाभं लाभान्तरं ततः अधिकम्

अस्तीति न मन्यते चिन्तयति।

किञ्च यस्मिन् आत्म-तत्त्वे स्थितः दुःखेन शस्त्र-निपातादि-लक्षणेन गुरुणा महतापि न विचाल्यते।।

२२ ।।

“यत्रोपरमते” (गी ६.२०) इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्टः आत्मावस्था-विशेषो योग उक्तः -

**तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।**

**स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा।। ६.२३ ।।**

तमिति। तं विद्यात् विजानीयात्। दुःख-संयोग-वियोगं दुःखैः संयोगः दुःख-संयोगः।

तेन वियोगः दुःख-संयोग-वियोगः। तं दुःख-संयोग-वियोगम्।

योग इत्येव संज्ञितम् विपरीत-लक्षणेन विद्याद् विजानीयादित्यर्थः।

योग-फलमुपसंहृत्य पुनः अन्वारम्भेण [6] योगस्य कर्त्तव्यतोच्यते निश्चय-अनिर्वेदयोः

योगसाधनत्वविधानार्थम्।

सः यथोक्त-फलो योगः निश्चयेन अध्यवसायेन योक्तव्यः अनिर्विण्णचेतसा न निर्विण्णम्

अनिर्विण्णम्।

किं तत् चेतः। तेन निर्वेद-रहितेन चेतसा चित्तेन इत्यर्थः।। २३ ।।

---

6 प्राकारान्तरेण योगस्य कर्त्तव्यत्वोपदेशारम्भोऽन्वारम्भः।

किञ्च -

**सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः।**

**मनसैवेन्द्रियग्राममं विनियम्य समन्ततः।। ६.२४**

**शनैश्शनैरुपरमेद् बुद्ध्या धृतिगृहीतया।**

**आत्मसंस्थं मनःकृत्वा न किञ्चिदपि चिन्तयेत्।। ६.२५ ।।**

सङ्कल्पेति। सङ्कल्पप्रभवान् सङ्कल्पः प्रभवो येषां कामानां ते सङ्कल्प-प्रभवाः कामाः तान् त्यक्त्वा परित्यज्य सर्वानशेषतः निर्लेपेन। किञ्च मनसैव विवेक-युक्तेन इन्द्रियग्रामम् इन्द्रिय-समुदायं विनियम्य नियमनं कृत्वा समन्ततः समन्तात्। २४

शनैरिति। शनैश्शनैः न सहसा उपरमेद् उपरतिं कुर्यात्। कया बुद्ध्या। किं विशिष्टया।

धृतिगृहीतया धृत्या धैर्येण गृहीतया धृति-गृहीतया। धैर्येण युक्तयेत्यर्थः।

आत्म-संस्थं आत्मनि संस्थितम् आत्मैव सर्वं, न ततोऽन्यत् किञ्चिदस्ति इत्येवम् आत्म-संस्थं

मनः कृत्वा न किञ्चिदपि चिन्तयेत्।

एष योगस्य परमो विधिः[7]।। २५ ।।

---

7 परमः अवधिरिति वा।

तत्रैवम् आत्म-संस्थं मनः कर्त्तुं प्रवृत्तो योगी -

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**

**ततस्ततो नियम्यैतद् आत्मन्येव वशं नयेत्।। ६.२६**

यत इति। यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेः निश्चरति निर्गच्छति स्वभाव-दोषाद् मनश्चञ्चलम् अत्यर्थं चलम् अत एव अस्थिरं ततस्ततः तस्मात् तस्माच्छब्दादेर्निमित्ताद् नियम्य तत्तन्निमित्तं याथात्म्य-निरूपणेनाऽऽभासीकृत्य वैराग्य-भावनया च एतद् मनः आत्मन्येव वशं नयेद् आत्म-वश्यतामापादयेत्। एवं योगाभ्यास-बलाद्योगिन आत्मन्येव प्रशाम्यति मनः।। २६ ।।

**प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।**

**उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्।। ६.२७**

प्रशान्तेति। प्रशान्तमनसं प्रकर्षेण शान्तं मनो यस्य स प्रशान्त-मनाः तं प्रशान्त-मनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयम् उपैति उपगच्छति शान्तरजसं प्रक्षीण-मोहादि-क्लेश-रजसमित्यर्थः। ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वम् इत्येवं निश्चयवन्तं ब्रह्मभूतम् अकल्मषम् अधर्मादि-वर्जितम्।।२७ ।।

**युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः।**

**सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।। ६.२८**

युञ्जन्निति। युञ्जन् एवं यथोक्तेन क्रमेण योगी योग-अन्तराय-वर्जितः सदाऽऽत्मानं युञ्जन् विगत-कल्मषः विगत-पापः सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद् ब्रह्म-संस्पर्शं सुखमत्यन्तम् अन्तमतीत्य वर्त्तत इत्यत्यन्तम् उत्कृष्टं निरतिशयम् अश्नुते व्याप्नोति।। २८ ।।

इदानीं योगस्य यत्फलं ब्रह्मैकत्व-दर्शनं सर्व-संसार-विच्छेद-कारणं तत्प्रदर्श्यते -

**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।**

**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।। ६.२९**

सर्वेति। सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वम् आत्मानं, सर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्ब-पर्यन्तानि च सर्व-भूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहिताऽन्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादि-स्थावरान्तेषु विषमेषु सर्व-भूतेषु समं निर्विशेषं ब्रह्मात्मैकत्व-विषयं दर्शनं ज्ञानं यस्य सः सर्वत्र सम-दर्शनः।। २९ ।।

एतस्यात्मैकत्व-दर्शनस्य फलमुच्यते -

**यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।**

**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।। ६.३० ।।**

य इति। यो मां पश्यति वासुदेवं सर्वस्याऽऽत्मानं सर्वत्र सर्वेषु भूतेषु सर्वं च ब्रह्मादि-भूत-जातं मयि सर्वात्मनि पश्यति। तस्य एवमात्मैकत्व-दर्शिनः अहम् ईश्वरः न प्रणश्यामि न परोक्षतां गमिष्यामि। स च मे न प्रणश्यति स च विद्वान् मम वासुदेवस्य न प्रणश्यति न परोक्षी भवति[8]।

तस्य च मम च एकात्मकत्वात्।

स्वात्मा हि नाम आत्मनः प्रिय एव भवति। यस्माच्चाहमेव सर्वात्मैकत्व-दर्शी इत्येतत्।। ३० ।।

8 परोक्षो भवतीति वा।

पूर्व-श्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षोऽभिधीयते -

**सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।**

**सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते।। ६.३१ ।।**

सर्वेति। सर्वथा सर्व-प्रकारैः वर्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्तते नित्य-

मुक्त एव सः। न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः।। ३१ ।।

किञ्चान्यत् -

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**

**सुखं वा यदि वा दुःखं स योगी परमो मतः।। ६.३२ ।।**

आत्मौपम्येनेति। आत्मौपम्येन आत्मा स्वयमेव उपमीयते अनयेत्युपमा, तस्या उपमाया भाव औपम्यं, तेनात्मौपम्येन सर्वत्र सर्व-भूतेषु समं तुल्यं पश्यति योऽर्जुन।

स च किं समं पश्यति इत्युच्यते - यथा मम सुखम् इष्टं तथा सर्व-प्राणिनां सुखमनुकूलम्।

वा-शब्दश्चार्थे। यदि वा यच्च दुःखं मम प्रतिकूलम् अनिष्टं यथा तथा सर्व-प्राणिनां दुःखम् अनिष्टं प्रतिकूलमित्येवम् आत्मौपम्येन सुख-दुःखे अनुकूल-प्रतिकूले तुल्यतया सर्व-भूतेषु समं पश्यति।

न कस्यचित् प्रतिकूलमाचरति, अहिंसक इत्यर्थः।

य एवमहिंसकः सम्यग्दर्शन-निष्ठः सः योगी परमः उत्कृष्टः मतः अभिप्रेतः सर्वयोगिनां मध्ये।। ३२

।।

एतस्य यथोक्तस्य सम-दर्शन-लक्षणस्य योगस्य दुःख-सम्पाद्यतामालक्ष्य शुश्रूषुर्ध्रुवं तत्प्राप्त्युपायम् -

**अर्जुन उवाच**

**योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।**

**एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ।। ६.३३ ।।**

योऽयमिति। योऽयं योगः त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्य अहं न पश्यामि नोपलभे चञ्चलत्वात् मनसः। किम् स्थिराम् अचलां स्थितिम्।। ३३ ।।

प्रसिद्धमेतत् -

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।**

**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।६.३४**

चञ्चलमिति। चञ्चलं हि मनः। कृष्ण इति कृषतेः विलेखनार्थस्य रूपम्। भक्त-जन-पापादि-दोष-आकर्षणात् कृष्णः। न केवलमत्यर्थं चञ्चलं प्रमाथि च प्रमथन-शीलं प्रमथ्नाति शरीरम्, इन्द्रियाणि च विक्षिपति परवशी करोति। किञ्च बलवद् न केनचित् नियन्तुं शक्यं, दुर्निवारत्वात्। किञ्च दृढं तन्तु-नागवद् अच्छेद्यम्। तस्य एवं-भूतस्य मनसः अहं निग्रहं निरोधं मन्ये वायोः इव। यथा वायोर्दुष्करो निग्रहः ततोऽपि मनसः दुष्करं मन्य इत्यभिप्रायः।। ३४ ।।

एवम् एतद्यथा ब्रवीषि -

**श्रीभगवानुवाच।**

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।६.३५**

असंशयमिति। असंशयं नास्ति संशयः मनो दुर्निग्रहं चलम् इत्यत्र हे महाबाहो।

किन्तु अभ्यासेन तु अभ्यासो नाम चित्त-भूमौ कस्याञ्चित् समान-प्रत्ययावृत्तिः चित्तस्य।

वैराग्येण वैराग्यं नाम दृष्टादृष्टेष्ट-भोगेषु दोष-दर्शनाभ्यासाद् वैतृष्ण्यं तेन च वैराग्येण गृह्यते विक्षेप-

रूपः प्रचारः चित्तस्य। एवं तन्मनः गृह्यते निगृह्यते निरुध्यत इत्यर्थः।।३५।

यः पुनरसंयतात्मा तेन -

**असंयतात्मना योगो दुष्प्राप इति मे मतिः।**

**वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः।। ६.३६ ।।**

असंयतात्मनेति। असंयतात्मना अभ्यास-वैराग्याभ्याम् असंयतः आत्माऽन्तःकरणं यस्य सोऽयम्

असंयतात्मा तेनासंयतात्मना योगो दुष्प्रापः दुःखेन प्राप्यत इति मे मतिः।

यस्तु पुनर्वश्यात्मा अभ्यास-वैराग्याभ्यां वश्यत्वमापादित आत्मा मनो यस्य सोऽयं वश्यात्मा, तेन

वश्यात्मना तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योगः उपायतः यथोक्ताद् उपायात्।। ३६

।।

तत्र योगाभ्यासाङ्गीकरणेन इहलोक-परलोक-प्राप्ति-निमित्तानि कर्माणि संन्यस्तानि, योग-सिद्धि-फलं च मोक्ष-साधनं सम्यग्दर्शनं न प्राप्तमिति, योगी योग-मार्गाद् मरण-काले चलित-चित्त इति तस्य नाशमाशङ्क्य -

**अर्जुन उवाच।**

**अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।**

**अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति।। ६.३७ ।।**

अयतिरिति। अयतिः अप्रयत्नवान्[9] योग-मार्गे श्रद्धया आस्तिक्य-बुद्ध्या च उपेतः, योगाद् अन्त-कालेऽपि चलितं मानसं मनो यस्य स चलितमानसः भ्रष्ट-स्मृतिः सः अप्राप्य योगसंसिद्धिं योग-फलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति इति।। ३७ ।।

---

9 अल्पार्थे नञ्।

**कश्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति।**

**अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि।।६.३८**

कश्चिदिति। कश्चित् किं न उभयविभ्रष्टः कर्म-मार्गाद्योग-मार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति।

किं वा न नश्यति। अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्म-प्राप्ति-मार्गे।।

३८ ।।

**एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।**

**त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते।। ६.३९**

एतदिति। एतन्मे मम संशयं कृष्ण च्छेत्तुम् अपनेतुम् अर्हस्यशेषतः।

त्वदन्यः त्वत्तोऽन्य ऋषिर्देवो वा च्छेत्ता नाशयिता संशयस्यास्य न हि यस्माद् उपपद्यते न

सम्भवति। अतः त्वमेव च्छेत्तुम् अर्हसीत्यर्थः।। ३९ ।।

**श्रीभगवानुवाच।**

**पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।**

**न हि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति ।। ६.४० ।।**

पार्थेति। हे पार्थ नैवेह लोके नामुत्र परस्मिन् वा लोके विनाशः तस्य विद्यते नास्ति।

नाशो नाम पूर्वस्माद् हीन-जन्म-प्राप्तिः सः योग-भ्रष्टस्य नास्ति।

न हि यस्मात् कल्याण-कृत् शुभ-कृत् कश्चिद् दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं पुत्र-

रूपेणेति पिता तात उच्यते, पितैव पुत्र इति पुत्रोऽपि तात उच्यते, शिष्योऽपि पुत्र-तुल्य उच्यते,

(न) गच्छति।। ४० ।।

किन्त्वस्य भवति -

**प्राप्य पुण्यकृताँल्लोकान् उषित्वा शाश्वतीः समाः।**

**शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।।६.४१**

प्राप्येति। योग-मार्गे प्रवृत्तः संन्यासी सामर्थ्यात् प्राप्य गत्वा पुण्यकृताम् अश्व-मेधादि-याजिनां लोकान् तत्र च उषित्वा वासमनुभूय शाश्वतीः नित्याः समाः संवत्सरान् तद्भोग-क्षये शुचीनां यथोक्त-कारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते।। ४१ ।।

**अथवा योगिनामेव कुले भवति धीमताम्।**

**एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्।। ६.४२**

अथेति। अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिमताम्।

एतद्धि जन्म यद्दरिद्राणां योगिनां कुले दुर्लभतरं दुःखेन लभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्त-विशेषणे कुले।। ४२ ।।

यस्मात् -

**तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्[10]।**

**यतते च ततो भूयः संसिद्धौ कुरुनन्दन।। ६.४३**

तत्रेति। तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं बुद्धि-संयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्व-देहिकम्।

यतते च प्रयत्नं करोति च ततः तस्मात् पूर्वकृतात् संस्काराद् भूयः बहुतरं संसिद्धौ संसिद्धि-निमित्तं हे कुरुनन्दन।। ४३ ।।

10 पौर्वदैहिकमिति पाठान्तरम्।

कथं पूर्व-देह-बुद्धि-संयोग इति तदुच्यते -

**पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।**

**जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते।। ६.४४**

पूर्वाभ्यासेनेति। यः पूर्व-जन्मनि कृतोऽभ्यासः स पूर्वाभ्यासः तेनैव बलवता ह्रियते संसिद्धौ हि

यस्माद् अवशोऽपि सः योग-भ्रष्टः।

न कृतं चेद् योगाभ्यास-संस्काराद् बलवत्तरम् अधर्मादि-लक्षणं कर्म, तदा योगाभ्यास-जनितेन

संस्कारेण ह्रियते[11]।

---

11 तेन योगज-संस्काराद् बलवत्तरमपि कर्म न कृतं चेदित्यन्वयः।

अधर्मश्चेद् बलवत्तरः कृतः तेन, योगजोऽपि संस्कारोऽभिभूयत एव।

तत्क्षये तु योगजः संस्कारः स्वयमेव कार्यमारभते न दीर्घ-कालस्थस्यापि विनाशः तस्यास्तीत्यर्थः।

अतो जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन्नपि योग-मार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात्

सोऽपि शब्द-ब्रह्म वेदोक्त-कर्मानुष्ठान-फलम् अतिवर्त्तते अतिक्रामति अपाकरिष्यति।

किमुत बुद्ध्वा यो योगं तन्निष्ठोऽभ्यासं कुर्यात्।। ४४ ।।

कुतश्च योगित्वं श्रेय इति -

**प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।**

**अनेकजन्मसंसिद्धः ततो याति परां गतिम्।। ६.४५ ।।**

प्रयत्नादिति। प्रयत्नाद्यतमानः अधिकं यतमान इत्यर्थः।

तत्र योगी विद्वान् संशुद्धकिल्बिषः विशुद्ध-किल्बिषः संशुद्ध-पापः अनेकेषु जन्मसु किञ्चित् किञ्चित् संस्कार-जातम् उपचित्य तेनोपचितेन अनेकजन्मकृतेन संसिद्धः अनेकजन्म-संसिद्धः ततो लब्ध-सम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिम्।। ४५ ।।

यस्मादेवं तस्मात् -

**तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः**

**कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।। ६.४६ ।।**

तपस्विभ्य इति। तपस्विभ्योऽधिको योगी, ज्ञानिभ्योऽपि ज्ञानमत्र शास्त्रार्थ-पाण्डित्यं तद्वद्भ्योऽपि

मतः ज्ञातः अधिकः श्रेष्ठ इति।

कर्मिभ्यः अग्निहोत्रादि कर्म, तद्वद्भ्यः अधिको योगी विशिष्टः यस्मात् तस्माद् योगी भवार्जुन।। ४६

।।

**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।**

**श्रद्धावान् भजते यो मां स मे युक्तमो मतः।। ६.४७ ।।**

**इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये षष्ठोऽध्यायः।।**

योगिनामिति। योगिनामपि सर्वेषां रुद्रादित्यादि-ध्यान-पराणां मध्ये मद्गतेन मयि वासुदेवे

समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो मां स मे मम

युक्ततमः अतिशयेन युक्तः मतः अभिप्रेत इति।४७

**ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः।**